इयम् आकाशवाणी

सम्प्रति वार्ता: श्रूयन्ताम्

प्रवाचकः – कृष्णप्रसादोऽपाध्यायः

दिनाङ्क :- 07.10.2024 सायम् - 06:20

आदौ-मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी, माल्दीव-देशस्य राष्ट्रपतिः डा. मोहम्मद् मुइज़ू च नवदेहल्ल्यां विचारविनिमयं कृतवन्तौ; माल्दीव्स्-देशे रूपे-कार्ड् इत्यस्य आरम्भेन द्वयोः देशयोः सम्बन्धः सुदृढश्च अभवत्।
- केन्द्रीय-गृह-मन्त्री अमितशाहः नवदेहली-नगरे नक्सल्-पीडित-राज्यानां मुख्यमन्त्रिणां समीक्षा-सभायाः आध्यक्षं अकरोत्।
- सूक्ष्म-आर्. एन्. ए. इति विषये कार्यार्थम् वैज्ञानिकाभ्यां भैषजशास्त्रस्य नोबेल्-पुरस्कारः प्रदत्तः।
- राष्ट्रिय-राजधानी-क्षेत्र-दिल्ल्यां पञ्चषष्टि-रूप्यकाणि प्रति-किलोग्राम् मूल्येन टमाटर इति रक्तफलानि विक्रयिष्यन्ते।
- ए. एस्. एस्. एफ्. जूनियर्-वर्ल्ड्-शूटिङ्ग्-च्याम्पियन्शिप् इति क्रीडायां, भारतं त्रयोदशस्वर्णपदकैः सह समग्र-पदकतालिकायां शीर्षस्थाने अस्ति।
- महिला-विशंतिं प्रति विंशतिः क्रिकेट्-विश्वकप्-क्रीडायां इङ्ग्लेण्ड्-देशः अद्य सायङ्काले शारजाह-नगरे दक्षिण-अफ़्रिका-देशेन सह क्रीडति।

अथ वार्ता: विस्तरेण

मालदीवस्य राष्ट्रपति:

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् मालदीव-देशाय सर्वप्रथम-प्रतिक्रियादातृषु देशेषु अन्यतमा भूमिका भारतेन निर्वोढाऽस्तीति। मालदीवदेशस्य राष्ट्रपतिना डॉ. मोहम्मद मुइज्ज़ू इत्यनेन सह प्रतिनिधिस्तरीय-सम्वादानन्तरं श्रीमोदिना एकस्मिन् संयुक्तवार्तासम्मेलने विषयेऽस्मिन् प्रकाशः पातितः उक्तञ्च यत् भारतेन सर्वदैव एकस्य परिवेशिनः रूपे स्वकीया भूमिका निर्वोढा। तेनोक्तं यत् भारतमालदीवयोर्मध्ये सम्बन्धः शताब्दशः प्राक्तनमस्ति,

भारतदेशश्च तस्य सर्वाति-पुरातनतमं मित्रमस्ति। मालदीवदेशः अस्माकं परिवेशि-प्रथमः अथ 'सागर' इति दृष्टिकोणयोः महत्वपूर्णं स्थानं धत्ते।

पीएम इंडो मालदीव्स – 32 से

प्रधानमन्त्रिणा मोदिना द्वीपराष्ट्रे भारते पूरितानां विभिन्नानां परियोजनानां विषयेऽपि सूचना दत्ता। तेनोक्तं यत् तेन मालदीवस्य राष्ट्रपतिना मुइज्जू इत्यनेन सह हनमाधू-अन्ताराष्ट्रिय वायु स्थानकस्य उड्डयनमार्गस्य आभासीय-माध्यनेन उद्घाटनं कृतम्।

मालदीव्स प्रोजेक्ट – 31 से.

भारतीय-रूपे-कार्ड इति धनविनिमय-माध्यमस्यापि स्वीकार्यता मालदीवदेशे समारब्धाऽस्ति। उभयोर्देशयोः मध्ये भ्रष्टाचार-शमनेन सह नैकविधानां द्विपक्षीयविषयाणामुपरि अपि सन्धिपत्रेषु हस्ताक्षराणि विहितानि सन्ति। स्वकीये वक्तव्ये डॉ मुइज्जू इत्यनेन प्रोक्तं यत् उभाभ्यां नेतृभ्यां विभिन्नेषु विषयेषु व्यापकी चर्चा कृतेति। उभयोर्देशयोर्मध्ये सफलविकासयात्रायाः पर्यवेक्षणेन सह भविष्यत्काले उभयोर्देशयोर्मध्ये सहयोगस्य रूपरेखायाः सन्नद्धतायै अपि चर्चा चर्चिता। तेनोक्तं यत् उभावपि देशौ द्विपक्षीयसम्बन्धानां दिशां निर्धारयितुमपि एकस्मिन् विशिष्टे प्रपत्रे कार्यरतौ स्तः इति।

<u>अमितशाह - LWE उपवेशनम्:-</u>

केन्द्रीयगृहमन्त्री अमितशाहः अद्य अवदत् यत् सर्वकारस्य उत्तम-केन्द्रराज्यसमन्वयेन देशात् नक्सलवादस्य पूर्णतया उन्मूलनं क्रियते। अद्य नवदिल्ल्यां श्रीशाहेन LWE इत्युक्ते वामदलीय-उग्रवादेन प्रभावितराज्यानां मुख्यमन्त्रिभिः सह समीक्षोपवेशनस्य अध्यक्षता कृता। सः अवदत् यत् नक्सलवादः विकासमार्गे बृहत्तमः अवरोधः अस्ति, अतः अनेन कस्यापि लाभः न भविष्यति। श्रीशाहः नक्सलवादेन सह सम्बद्धानां सर्वेषां यूनां आवाहनं कृतवान् यत् ते शस्त्राणि त्यक्त्वा मुख्यधारायां सम्मिलिताः भवेयुरिति।

अमितशाह रिक्वेस्ट – 35 से.

गृहमन्त्री अवदत् यत्, षड्विंशत्यधिक द्विसहस्रतम-वर्षस्य मार्चमासान्तं यावत् वामदलीय-उग्रवादं पूर्णतया समापयितुं सर्वकारः प्रतिबद्धः अस्तीति।

अमितशाह 2026 – 18 से.

विराम:

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

मतगणना

मंगलवासरे जायमानायै जम्मू-कश्मीर-हरियाणा-विधानसभयोः निर्वाचनस्य मतगणनायै सज्जता सजवं प्रचलति। राजनैतिक-भाग्यपरीक्षणे त्रिसप्तत्याधिकाष्टशत- प्रत्याशिनः जम्मूतः एकत्रिंशदधिकैकहस्रं प्रत्याशिनश्च कश्मीरतः सन्ति। जम्मूकश्मीरराज्यस्य मतगणनायै विंशतिः मतगणना-केन्द्रानि सन्ति विनिर्मितानि। सुचारु-मतगणनायै हरियाणा-जम्मू-कश्मीरयोः सर्वेषु मतगणना-केन्द्रेषु कठोरसुरक्षाव्यवस्था कृता अस्ति। हरियाणा-विधानसभानिर्वाचने प्रायः सप्तषष्टि: प्रतिशतमितं मतदानं संजातम्। राज्यस्य सर्वेषु नवतिः निर्वाचनक्षेत्रेषु मतदानम् अभवत्। मतदानप्रक्रियायाः शान्तिपूर्णसमाप्तेः अनन्तरं अधुना विभिन्नेषु जनपदेषु सशक्तकक्षेषु त्रिस्तरीय कठिनसुरक्षायाः अन्तर्गतं इलेक्ट्रॉनिक-मतदान-यन्त्राणि सुरक्षितानि सन्ति। जम्मू-कश्मीर-राज्ये त्रिषु चरणेषु सितम्बर मासस्य अष्टादश, पञ्चविंशतिः, अथ च अक्टूबर मासस्य प्रथमे दिनांके मतदानं सञ्जातम्। तत्र चतुः षष्टिप्रतिशतमितं मतदानं परिगणितमासीत्।

अनुच्छेद सप्तत्यधिकत्रिशतम् इत्यस्य निष्कासनानन्तरं केन्द्र-शासितप्रदेशे प्रथमवारं विधान-सभानिर्वाचनं सफलतया पूर्णरीत्या च विहितम्।

गुजरात विकास सप्ताह

गुजराते नरेन्द्रमोदिनः नेतृत्वे मार्गदर्शने च त्रयोविंशतिः वर्षाणां राज्यस्य विकासयात्रायाः अवसरे विकाससप्ताह-उत्सवस्य आरम्भः अद्य अभवत्। मुख्यमन्त्री भूपेन्द्र पटेलः अन्ये मन्त्रिणश्च विकास-प्रक्रियायां जनानां सहभागितां प्रोत्साहयितुं भारतविकासप्रतिज्ञां स्वीकृतवन्तः। आगामिषु सप्तदिनेषु सार्ध-त्रिशत -कोटिरूप्यकाणां विकासपरियोजनानां आरम्भोऽपि भविष्यति।

नोबेल् पुरस्कारः

अस्य वर्षस्य शरीरविज्ञानस्य उतो वा चिकित्साविधानस्य नोबेल् इत्याख्यः पुरस्कारः विक्टर् एम्ब्रोस् तथा गैरी रुव्कुन् इत्येतयोः वैज्ञानिकयोः मैक्रो आर्. एन्. ए. इति आविष्काराय तथा च उत्तर-प्रतिलेखन-जीन्-नियमने तयोः भूमिकायाः कृते प्रदत्ता अस्ति।

रक्तफलमूल्यम्

राष्ट्रिय-राजधानी-क्षेत्र-दिल्ल्यां पञ्चषष्टि-रूप्यकाणि प्रति-किलोग्राम् मूल्येन टमाटर इति रक्तफलानि विक्रयिष्यन्ते।

जूनियर्-वर्ल्ड्-शूटिङ्ग्-च्याम्पियन्शिप्

ए. एस्. एस्. एफ्. जूनियर्-वर्ल्ड्-शूटिङ्ग्-च्याम्पियन्शिप् इति क्रीडायां, भारतं त्रयोदशस्वर्णपदकैः सह समग्र-पदकतालिकायां शीर्षस्थाने अस्ति।

महिला क्रिकेट स्पर्धा

महिला- विंशतिं प्रति विंशतिः क्रिकेट्-विश्वचषक-क्रीडायां इङ्ग्लेण्ड्-देशः अद्य सायङ्काले शारजाह नगरे दक्षिण-आफ्रिका-देशेन सह क्रीडति।

।। इति वार्ताः।।